श्री हनुमत् स्तोत्रं (विभीषण कृतं)

श्री हनुमत् स्तोत्रं (विभीषण कृतं)

नमो हनुमते तुभ्यं नमो मारुतसूनवे |
नमः श्रीरामभक्ताय श्यामास्याय च ते नमः || 1 ||

नमो वानरवीराय सुग्रीवसख्यकारिणे |
लंकाविदाहनार्थाय हेलासागरतारिणे || 2 ||

सीताशोकविनाशाय राममुद्राधराय च |
रावणस्यकुलच्छेदकारिणे ते नमो नमः || 3 ||

मेघनादमखध्वंसकारिणे ते नमो नमः |
अशोकवनविध्वंसकारिणे भयहारिणे || 4 ||

वायुपुत्राय वीराय ह्याकाशोदरगामिने |
वनपालशिरश्छेदलंकाप्रासादभंजिने || 5 ||

ज्वलत्कनकवर्णाय दीर्घलांगूलधारिणे |
सौमित्रि जयदात्रे च रामदूताय ते नमः || 6 ||

अक्षस्य वधकर्त्रे च ब्रह्मपाशनिवारिणे |
लक्ष्मणांगमहाशक्तिघातक्षतविनाशिने || 7 ||

रक्षोघ्नाय रिपुघ्नाय भूतघ्नाय च ते नमः |
ऋक्षवानरवीरौघप्राणदाय नमो नमः || 8 ||

परसैन्यबलघ्नाय शस्त्रास्त्रघ्नाय ते नमः |
विषघ्नाय द्विषघ्नाय ज्वरघ्नाय च ते नमः || 9 ||

महाभयरिपुघ्नाय भक्तत्राणैककारिणे |
परप्रेरितमंत्राणां यंत्राणां स्तंभकारिणे || 10 ||

पयःपाषाणतरणकारणाय नमो नमः |
बालार्कमंडलग्रासकारिणे भवतारिणे || 11 ||

नखायुधाय भीमाय दंतायुधधराय च |
रिपुमायाविनाशाय रामाज्ञालोकरक्षिणे || 12 ||

प्रतिग्रामस्थितायाऽथ रक्षोभूतवधार्थिने |
करालशैलशस्त्राय द्रुमशस्त्राय ते नमः || 13 ||

बालैकब्रह्मचर्याय रुद्रमूर्तिधराय च |
विहंगमाय सर्वाय वज्रदेहाय ते नमः || 14 ||

कौपीनवाससे तुभ्यं रामभक्तिरताय च |
दक्षिणाशाभास्कराय शतचंद्रोदयात्मने || 15 ||

कृत्याक्षतव्यथघ्नाय सर्वक्लेशहराय च |
स्वाम्याज्ञापार्थसंग्रामसंख्ये संजयधारिणे || 16 ||

भक्तांतदिव्यवादेषु संग्रामे जयदायिने |
किल्किलाबुबुकोच्चारघोरशब्दकराय च || 17 ||

सर्पाग्निव्याधिसंस्तंभकारिणे वनचारिणे |
सदा वनफलाहारसंतृप्ताय विशेषतः || 18 ||

महार्णवशिलाबद्धसेतुबंधाय ते नमः |
वादे विवादे संग्रामे भये घोरे महावने || 19 ||

सिंहव्याघ्रादिचौरेभ्यः स्तोत्रपाठाद्भयं न हि |
दिव्ये भूतभये व्याधौ विषे स्थावरजंगमे || 20 ||

राजशस्त्रभये चोग्रे तथा ग्रहभयेषु च |
जले सर्वे महावृष्टौ दुर्भिक्षे प्राणसंप्लवे || 21 ||

पठेत् स्तोत्रं प्रमुच्येत भयेभ्यः सर्वतो नरः |
तस्य क्वापि भयं नास्ति हनुमत् स्तवपाठतः || 22 ||

सर्वदा वै त्रिकालं च पठनीयमिदं स्तवं |
सर्वान् कामानवाप्नोति नात्र कार्या विचारणा || 23 ||

विभीषणकृतं स्तोत्रं ताक्ष्र्येण समुदीरितं |
ये पठिष्यंति भक्त्या वै सिद्धयस्तत्करे स्थिताः || 24 ||

इति श्रीसुदर्शनसंहितायां विभीषणगरुडसंवादे विभीषणप्रोक्त हनुमत् स्तोत्रं ||